४ ५ ६ ७ ८ ९ १० सविहारंसलीलं ११ प्रतिमहायप्रसुक्रमनाय १२ १३ १४ कौतूहलेनदर्शनेछया १५ १५

रामकृष्णौचधर्मज्ञौतदागछंतुपांडवाः एतौहिपुरुषव्याघ्रावेषांप्रियहितेरतौ ४ युधिष्ठिरउवाच एवंनोवयंराजंस्त्वपिसर्वेमहानु
गाः यथावक्ष्यसितनः प्रीत्यातत्करिष्यामहेवयं ५ वैशं० ततोब्रवीद्वासुदेवोगमनंरोचतेमम यथावामन्यतेराजाद्रुपदः सर्वधर्मवि
त् ६ द्रुपदउवाच यथैव[illegible]मन्यतेवीरोदाशार्हः पुरुषोत्तमः प्राप्तकालंमहाबाहुः साबुद्धिर्निश्चितामम ७ यथैवहिम
हाभागाः कौंतेयाममसांप्रतं तथैववासुदेवस्यपांडुपुत्रानसंशयः ८ नतद्ध्यापतिकौंतेयः पांडुपुत्रोयुधिष्ठिरः यथैषांपुरु
षव्याघ्रः श्रेयोध्यायतिकेशवः ९ वैशं० ततस्तेसमनुज्ञाताद्रुपदेनमहात्मना पांडवाश्चैवकृष्णश्चविदुरश्चमहीपते १० आ
दायद्रौपदींकृष्णांकुंतींचैवयशस्विनीं सविहारंसुखंजग्मुर्नगरंनागसाह्वयं ११ श्रुत्वाचाप्यागतान्वीरान्धृतराष्ट्रोजनेश्वरः प्रति
ग्रहायपांडूनांप्रेषयामासकौरवान् १२ विकर्णंचमहेष्वासंचित्रसेनंचभारत द्रोणंचपरमेष्वासंगौतमंकृपमेवच १३ तैस्ते
परिवृतावीराः शोभमानामहाबलाः नगरंहास्तिनपुरंशनैः प्रविविशुस्तदा १४ कौतूहलेननगरंदीप्यमानमिवाभवत्
तत्रतेपुरुषव्याघ्राः शोकदुःखविनाशनाः १५ १५ श्रीरामरामरामरामरामरामरा

आ०
२३९

१६ १७ १८ किंनुनःप्रियंनकृतंअपितुसर्वंकृतमेव किंतुइतियोदतुशब्दोवाक्यालंकारेवनःशब्दार्थः किंपुनर्नेकृतंअपितुसर्वंकृतमेवेतिपूर्ववदेवार्थः १९ २० २१ नगरे

ततउच्चावचावाचः पौरैःप्रियचिकीर्षुभिः उदीरिताअश्रुश्रावंस्तेपांडवाःपुरुषर्षभाः १६ अयंसपुरुषव्याघ्रःपुनरायातिधर्मवित् योनः
स्वानिवदायादान्धर्मेणाभिरक्षति १७ अद्यपांडुर्महाराजोवनादिवजनप्रियः आगतःप्रियमस्माकंचिकीर्षुर्नात्रसंशयः १८ किं
नुनाद्यकृतंतातसर्वेषांनःपरंप्रियं यन्नःकुंतीसुतावीरानगरंपुनरागताः १९ यदिदत्तंयदिहुतंविद्यतेयदिनस्तपः तेनतिष्ठंतुनग
रेपांडवाःशरदांशतं २० ततस्तेधृतराष्ट्रस्यभीष्मस्यचमहात्मनः अन्येषांचतदर्हाणांचक्रुःपादाभिवंदनं २१ कृत्वातुकुशलप्र
श्नंसर्वेणनगरेणच न्यविशंतगृहेवेश्मानिधृतराष्ट्रस्यशासनात् २२ विश्रांतास्तेमहात्मानःकंचित्कालंमहाबलाः आहूताधृत
राष्ट्रेणराज्ञाशांतनवेनच २३ धृतराष्ट्रउवाच भ्रातृभिःसहकौंतेयनिबोधगदतोमम पुनर्नोविग्रहोमाभूत्खांडवप्रस्थमाविश
२४ नचवोवसतस्तत्रकश्चिच्छक्तःप्रबाधितुं संरक्ष्यमाणान्पार्थेनत्रिदशानिववज्रिणा अर्द्धंराज्यस्यसंप्राप्यखांडवप्रस्थमावि
श वैशंपायनउवाच प्रतिगृह्यतुतद्वाक्यंनृपंसर्वेप्रणम्यच प्रतस्थिरेततोघोरंवनंतन्मनुजर्षभाः २६ ॥ ॥

णासहकुशलप्रश्नंकृत्वानगरेणाविकृतनकुशलप्रश्नाः २२ २३ २४ पार्थेनअर्जुनेन २५ घोरंवनमितिम्लेच्छदेशस्यभूम्यादेशः पांडवेभ्योदत्तइतिज्ञायते २६

रा०
२३९

२७ तेहेतत्तद्घोरं वनं सत्स्वर्गवत् मंडयांचक्रिरे २८ तेद्वाहनगरंमापयामासुरित्यादिना २९ ३० भोगवतीमिवेतिप्रथमार्थेद्वितीयार्ईमितिनिपातनेलोप्रयोगाभोगवतीयथे त्युपेक्षितप्रमादपाठोवा ३१ निर्विद्धैः श्वछिद्रैः श्वमेधैर्वा ३२ शक्तिभिर्हस्तक्षेप्याभिर्लोहमयीभिः ३३ तीक्ष्णांकुशाङ्कुशाश्च शतघ्न्यश्चताभिः आग्नेयोषधवले

५३

अर्द्धराष्ट्रस्य संप्राप्य खांडवप्रस्थमाविशन् ततस्ते पांडवास्तत्र गत्वा कृष्णपुरोगमाः २७ मंडयांचक्रिरे तद्वै पुरं स्वर्गवदच्युताः ततः पुण्ये शिवेदेशे शांतिं कृत्वा महारथाः २८ नगरं मापयामासुर्द्वैपायनपुरोगमाः सागरप्रतिरूपाभिः परिखाभिरलंकृतं २९ प्राकारेण च संपन्नं दिवमावृत्यतिष्ठता पांडुराभ्रप्रकाशेन हिमरश्मिनिभेन च ३० शुशुभे तत्पुरश्रेष्ठं नागैर्भोगवतीमिव द्विपक्षगरुडप्रख्यैर्द्वारैः सौधैश्च शोभितं ३१ गुप्तमभ्रचयप्रख्यैर्गोपुरैर्मंदरोपमैः विविधैरतिनिर्विद्धैः शस्त्रोपेतैः सुसंवृतैः शक्तिभिश्चावृतं तद्धि द्विजिह्वैरिव पन्नगैः तल्पैश्चाभ्यासिकैर्युक्तं शुशुभे योधरक्षितं ३३ तीक्ष्णांकुशशतघ्नीभिर्यंत्रजालैश्च शोभितं आयसैश्च महाचक्रैः शुशुभे तत्पुरोत्तमं ३४ सुविभक्तमहारथ्यं देवताबाधवर्जितं विरोचमानं विविधैः पांडुरैर्भवनोत्तमैः ३५ तत्त्रिविष्टपसंकाशमिंद्रप्रस्थं व्यरोचत मेघवृंदमिवाकाशे विद्धं विद्युत्समावृतं ३६

तउक्तंक्षिप्तेनदृषत्सिंदेनयाः युगपत्शतं सहस्रं वा मनुष्याहीनर्घ्नंतिताभिः शतघ्नीभिर्दुर्गारक्षणिभिः ३४ ३५ विद्धंमिश्रंशिल्पं ३६ ॥ ३६ ॥

आ०
३५०

क्षयोपमंमहोमं ३७ ३९ ४१ ४२ ४३ ४४ अजगतिपर्वतैः नपलीलापात्रौर्थैः कृत्रिमैः पर्वतैः अजस्थोगेहरिब्रह्मविल्वसमहेन्द्रपगतिः स्त्रीमार्गदर्शयो

दर्शनेपात्राम्बुकापयो

तत्ररम्येशिवेदेशेकौरवस्यनिवेशनं शुशुभेसर्वसंपूर्णंधननाथस्यक्षयोपमं ३७ तत्रागच्छन्हिज्ञामर्त्यास्सर्वेवेदविदांवराः निवासंयेचयंतिस्मस
वेभाषाविदस्तथा ३८ वणिजश्चाययुस्तत्रनानादिग्भ्योधनार्थिनः सर्वशिल्पविदस्तत्रवासायाभ्यागमस्तदा ३९ उद्यानानिचरा
म्याणिनगरस्यसमंततः आम्रैराम्रातकैर्नीपैरशोकैश्चंपकैस्तथा ४० पुन्नागैर्नागपुष्पैश्चलकुचैः पनसैस्तथा शालतालतमा
लैश्चवकुलैश्चसकेतकैः ४१ मनोहरैः सुपुष्पैश्चफलभारावनामितैः प्राचीनामलकैर्लोध्रैरंकोलैश्चसुपुष्पितैः ४२ जंबूभिः
पाटलाभिश्चकुलकैरतिमुक्तकैः करवीरैः पारिजातैरम्यैश्चविविधैर्द्रुमैः ४३ नित्यपुष्पफलोपेतैर्नानाद्विजगणायुतैः मत्तबर्हि
णासंघुष्टंकोकिलैश्चसदामदैः ४४ गृहैराद्रर्शविमलैर्विविधैश्चलतागृहैः मनोहरैश्चित्रगृहैस्तथाजगतिपर्वतैः ४५ वापीभि
र्विविधाभिश्चपूर्णाभिः परमांभसा सोपानैरतिरम्यैश्चपद्मोत्पलसुगंधिभिः ४६ हंसकारंडवयुतैश्चक्रवाकोपशोभितैः रम्याश्चवि
विधास्तत्रपुष्करिण्योवनावृताः नद्यागावि चरम्याणिरहंतिसुबहूनिच ४७ ॥ ॥

राम०
३५०

रितिमेदिनी ४५ ४६ वनावृतावनैः आरामैः आरताः जलपूर्णावा ४७ ॥ ॥ ॥ ॥ ॥

पुरोपपन्नैरुपेतं ४८ राज्ञो धृतराष्ट्रस्य धर्मस्य युधिष्ठिरस्य परोक्षे निप्रायेण ४९ ५० ५१ इति नैलकंठीये भारतभावदीपे आदिपर्वणि युधिष्ठिरराज्यलाभोत्तरग्रंथार्थप्रकाशः

तेषां पुरापन्नोपेतं राष्ट्रमाविशत्तां महत् पांडवानां महाराज शश्वत्प्रीतिरवर्द्धत ४ तत्र भीष्मेण राज्ञा च धर्मप्रणयने कृते पांडवाः समपद्यंत खांडवप्रस्थवासिनः ४९ पंचभिस्तैर्महेष्वासैरिंद्रकल्पैः समन्वितं शुशुभे तत्पुरश्रेष्ठं नागैर्भोगवती यथा ५० तान्निवेश्य ततो वीरो रामेण सह केशवः ययौ द्वारवतीं राजन् पांडवानुमते तदा ५१ इत्यादिपर्वणि २०१ राज्यलाभः जनमेजय उवाच एवं संप्राप्य राज्यं तदिंद्रप्रस्थं तपोधन अत ऊर्द्ध्वं महात्मानः किमकुर्वंत पांडवाः १ सर्व एव महात्मानो मम पूर्वपितामहाः द्रौपदी धर्मपत्नी च कथं तानन्ववर्त्तत २ कथं च पंच कृष्णायामेकस्यां ते नराधिपाः वर्त्तमाना महाभागा नाभिद्यंत परस्परं ३ श्रोतुमिच्छाम्यहं सर्वं विस्तरेण तपोधन तेषां चेष्टितमन्योन्यं युक्तानां कृष्णया सह ४ वैशंपायन उवाच धृतराष्ट्राभ्यनुज्ञाताः कृष्णया सह पांडवाः रेमिरे खांडवप्रस्थे प्राप्तराज्याः परंतपाः ५ प्राप्य राज्यं महातेजाः सत्यसंधो युधिष्ठिरः पालयामास धर्मेण पृथिवीं भ्रातृभिः सह ६ जितारयो महाप्राज्ञाः सत्यधर्मपरायणाः मुदं परमिकां प्राप्तास्तत्रोषुः पांडुनंदनाः ७

एवं १ २ ३ ४ ५ ६ तत्रोषुः तत्रेंद्रप्रस्थे ऊषुर्वासं कृतवंतः ७ ॥ ॥ ॥

आसांचक्रुः स्थिरासनावभवुः पार्थिवेषु राजसंबंधिषु आसनेषु अधिकारविशेषेषु ८ १२ १३ सुसंवीता सम्यक्कृतावगुंठना: १४ १९ १९ १९ १९

कुर्वाणाः पौरकार्याणि सर्वाणि पुरुषर्षभाः आसांचक्रुर्महार्हेषु पार्थिवेष्वासनेषु च ८ अथ तेषूपविष्टेषु सर्वेष्वेव महात्मसु नारदस्त्वथ देवर्षिराजगाम यदृच्छया आसनं रुचिरं तस्मै प्रददौ स्वं युधिष्ठिरः ९ देवर्षेरुपविष्टस्य स्वयमर्घ्यं यथाविधि प्रादाद्युधिष्ठिरो धीमान्राज्यं तस्मै न्यवेदयत् १० प्रतिगृह्य तु तां पूजामृषिः प्रीतमनास्तदा आशीर्भिर्वर्द्धयित्वा च तमुवाचास्यतामिति ११ निषसादाभ्यनुज्ञातस्ततो राजा युधिष्ठिरः प्रेषयामास कृष्णायै भगवंतमुपस्थितं १२ श्रुत्वैतद् द्रौपदी चापि शुचिर्भूत्वा समाहिता जगाम तत्र यत्रास्ते नारदः पांडवैः सह १३ तस्याभिवाद्य चरणौ देवर्षेर्धर्मचारिणी कृतांजलिः सुसंवीता स्थिताथ द्रुपदात्मजा १४ तस्याश्चापि स धर्मात्मा सत्यवागृषिसत्तमः आशिषो विविधाः प्रोच्य राजपुत्र्यास्तु नारदः १५ गम्यतामिति होवाच भगवांस्तामनिंदितां गतायामथ कृष्णायां युधिष्ठिरपुरोगमान् विविक्ते पांडवान्सर्वानुवाच भगवानृषिः १६ नारद उवाच पांचाली भवतामेका धर्मपत्नी यशस्विनी यथा वो नात्र भेदः स्यात्तथा नीतिर्विधीयतां १७ सुंदोपसुंदौ हि पुरा भ्रातरौ सहितावुभौ आस्तामवध्यावन्येषां त्रिषु लोकेषु विश्रुतौ १८ एकराज्यावेकगृहावेकशय्यासनाशनौ। तिलोत्तमायास्तौ हेतोरन्योन्यमभिजघ्नतुः १९ ॥ ॥ ॥ ॥

अन्योन्यप्रीतिभावकं। परस्परप्रीत्याभावो वृद्धिर्यस्य तत्तथा २० अघ्नतां हतवंतौ २१ कस्य देवस्य कन्या १२ २३ अध्यायः शृणु १२ ३ निरंतरमतिभेदं विना ४५६ ७८

र्सनं नो ऽद्रुहं तस्मादन्योन्यप्रीतिभावकं यथा वो नात्र भेदः स्यात्तत्कुरुष्व युधिष्ठिर २० युधिष्ठिर उवाच सुंदोपसुंदावसुरौ कस्य पुत्रौ महामुने
उत्पन्नश्च कथं भेदः कथं चान्योन्यमघ्नतां २१ अप्सरा देवकन्या वा कस्य चैषा तिलोत्तमा यस्याः कामेन संमत्तौ जघ्नतुस्तौ परस्परं २२
एतत्सर्वं यथावृत्तं विस्तरेण तपोधन श्रोतुमिच्छामहे ब्रह्मन्परं कौतूहलं हि नः २३ इत्यादिपर्वणि २०१ नारद उवाच शृणु
मे विस्तरेणेममितिहासं पुरातनं भ्रातृभिः सहितः पार्थ यथावृत्तं युधिष्ठिर १ महासुरस्यान्ववाये हिरण्यकशिपोः पुरा निकुंभो ना
म दैत्येंद्रस्तेजस्वी बलवानभूत् २ तस्य पुत्रौ महावीर्यौ जातौ भीमपराक्रमौ सुंदोपसुंदौ दैत्येंद्रौ दारुणौ क्रूरमानसौ ३ तावेकनिश्च
यौ दैत्यावेककार्यार्थसंमतौ निरंतरमवर्तेतां समदुःखसुखावुभौ ४ विनान्योन्यं न भुंजाते विनान्योन्यं न जल्पतः अन्योन्यस्य प्रि
यकरावन्योन्यस्य प्रियंवदौ ५ एकशीलसमाचारौ द्विधैवैकोऽभवत्कृतः तौ विवृद्धौ महावीर्यौ कार्येष्वप्येकनिश्चयौ ६ त्रैलोक्य
विजयार्थाय समाधायैकनिश्चयं दीक्षां कृत्वा गतौ विंध्यं तावुग्रं तेपतुस्तपः ७ तौ तु दीर्घेण कालेन तपोयुक्तौ बभूवतुः क्षुत्पिपा
सापरिश्रांतौ जटावल्कलधारिणौ ८ ॥

श्री०
३४२

९ १० ११ १२ १३ १५ १६ १७ १८ १९ २० २१ २१

मलोपचितसर्वांगौवायुभक्षौबभूवतुः आत्ममांसानिजुह्वंतौपादांगुष्ठाग्रधिष्ठितौ ऊर्द्ध्ववाहूचा[illegible]निमेषौदीर्घकालंधृतव्रतौ ९ तयो
स्तपः प्रभावेणादीर्घकालंप्रतापितः धूमंप्रमुमुचेविंध्यस्तदद्भुतमिवाभवत् १० ततोदेवाभयंजग्मुरुग्रंदृष्ट्वातयोस्तपः तपोविघातार्थम
थोदेवाविघ्नानिचक्रिरे ११ रत्नैः प्रलोभयामासुः स्त्रीभिर्भोगैःपुनः पुनः नचतौचक्रतुर्भंगंव्रतस्यसुमहाव्रतौ १२ अथमायांपुनर्दे
वास्तयोश्चक्रुर्महात्मनोः भगिन्योमातरोभार्या[illegible]स्तयोश्चात्मजनस्तथा १३ प्रपात्यमानाविन्यस्ताः शूलहस्तेनरक्षसा भ्रष्टाभर
णकेशांताभ्रष्टाभरणवाससः १४ अभिभाष्यततः सर्वास्तौत्राहीतिविचुक्रुशुः नचतौचक्रतुर्भंगंव्रतस्यसुमहाव्रतौ १५ यदाक्षोभं

प नौयातिनान्यतरस्तयोः ततस्त्रियस्ताभूतंचसर्वमंतरधीयत १६ ततःपितामहःसाक्षादभिगम्यमहावरौ वरेणच्छंदयामास
सर्वलोकहितः प्रभुः १८ ततः सुंदोपसुंदौतौभ्रातरौदृढविक्रमौ दृष्ट्वापितामहंदेवंतस्थतुःप्रांजलीतदा १९ ऊचतुश्चप्रभुं
देवंततस्तौसहितौतदा आवयोस्तपसानेनयदिप्रीतःपितामहः २० मायाविदावस्त्रविदौबलिनौकामरूपिणौ उभावप्यमरौ
स्यावः प्रसन्नोयदिनोप्रभुः २१

राम०
३४२

येनामरत्तुल्यत्वं भवेत्तादृशं विधानं दृशीं तं ज्ञापयत २२ प्रभविष्यावः प्रभुत्वैश्वर्ये करिष्यावः यत्कामोपहारमेतत्समाप्तो न देवत्वमनेनाप्यदिस्यथेः २३ ४ यथावद्वाय

ब्रह्मोवाच ऋतेमरत्वं युवयोः सर्वमुक्तं भविष्यति अन्यद्वृणीतं मृत्योश्च विधानममरैः समं २१ प्रभविष्याव इति यन्महदभ्युद्य
तं तपः युवयोर्हेतुनानेन नामरत्वं विधीयते २३ त्रैलोक्यविजयार्थाय भवद्भ्यामास्थितं तपः हेतुनानेन दैत्येंद्रौ न वां कामं करोम्यहं
२४ सुंदोपसुंदौ ऊचतुः त्रिषु लोकेषु यद्भूतं किंचित्स्थावरजंगमं सर्वस्मान्नौ भयं न स्यादृतेन्योन्यं पितामह २५ पितामह उवाच यं
त्प्रार्थितं यथोक्तं च काममेतद्ददामि वां मृत्योर्विधानमेतच्च यथावद्वां भविष्यति २६ नारद उवाच ततः पितामहो दत्वा वरमेतत्तदान
यो: निवर्त्य तपसस्तौ च ब्रह्मलोकं जगाम ह २७ लब्ध्वा वराणि दैत्येंद्रावथ तौ भ्रातरावुभौ अवध्यौ सर्वलोकस्य स्वमेव भवनं गतौ
२८ तौ तु लब्धवरौ दृष्ट्वा कृतकामौ मनस्विनौ सर्वः सुहृज्जनस्ताभ्यां प्रहर्षमुपजग्मिवान् २९ ततस्तौ तु जटा भित्वा मौलिनौ सं
बभूवतुः महार्हाभरणोपेतौ विरजोंबरधारिणौ ३० अकालकौमुदीं चैव चक्रतुः सार्वकालिकीं नित्यप्रमुदितः सर्वस्तयोश्चै
व सुहृज्जनः ३१ भक्ष्यतां भुज्यतां नित्यं दीयतां रम्यतामिति गीयतां पीयतां चेति शब्दश्चासीद्गृहे गृहे ३२ ३१

हा२

यावदेव २४ २८ मौलिनौ किरीटवंतौ मौलिः किरीटे धम्मिल्ले इति मेदिनी। वीरवादिनी ब्रीरवादिवादिनः ३२ ३१ ३१

तल्लनादितैः करतलध्वनिभिः वाद्यघोषैर्वा ३३ समाः वह्निर्वर्षाणि रण्कं दिनमिवाभूत् ३४ अध्यायः उत्तवे १ मद्यासुगमनार्थेनि विष्टे विनक्षत्रे आसुरत्वात्पयतुः

तत्र तत्र महानादैः रुलत्कलतल्लनादितैः हर्षप्रमुदितैः सर्वैर्दैत्यानामभवत्पुरं ३३ तैस्तैर्विहारैर्वहुभिर्दैत्यानां कामरूपिणां समाः संक्रीडतां तेषां महैकमिवाभवत् ३४ इत्यादिपर्वणि नारद उवाच उक्तवरत्नमात्रेतु त्रैलोक्याकांक्षिणावुभौ मंत्रयित्वा ततः सेनां लात्वाज्ञापयतां तदा १ सुतष्टिरण्यतुल्यानौ दैत्येन्द्रैः श्वमंत्रिभिः कलाप्रास्थानिकं रात्रौ मघास्तुपयतुस्तदा २ गदापट्टिशधारिणावाशूलमुद्गरहस्तौ प्रस्थितौ सहवर्मिणाम हस्ताद्दैत्यसंनया ३ मंगलैः स्तुतिभिश्चापि विजयप्रतिसंहितैः चारणैः स्तूयमानौ तौ जग्मतुः परया मुदा ४ तावंतरिक्षमुत्क्लुत्य दैत्यौ कामगमावुभौ देवानामेव भवनं जग्मतुर्युद्धदुर्मदौ ५ तयोरागमनं ज्ञात्वा वरदानं च तत्स्वभोः हित्वा त्रिविष्टपं जग्मुर्ब्रह्मलोकं ततः सुराः ६ ताविन्द्रलोकं निर्जित्य यक्षरक्षोगणांस्तदा खेचराण्यपि भूतानि जघ्नतुस्तीव्रविक्रमौ ७ अन्तर्भूमिगतान्नागान्जित्वा तौ च महारथौ समुद्रवासिनीः सर्वाम्लेच्छजातीर्विजिग्यतुः ८ ततः सर्वां महीं जेतुमारब्धावुग्रशासनौ सैनिकांश्च समाहूय सतीक्ष्णां वाकमूचतुः ९ राजर्षयो महायज्ञैर्हव्यकव्यैर्द्विजातयः तेजो बलं च देवानां वर्द्धयन्ति श्रियं तथा १०

२ ३ विजयप्रतिसंहितैः विजयकथकैः ४ ५ ६ ७ ८ ९ १० १० १०

११ १४ नाक्रामंतनव्याघ्रवंतः तयोः तौकमेणाधृष्टौ १५ १८ अदृश्यपिङ्गरंतर्हितैः ऋषिभिर्हेतुभूतैस्तौ विकुर्वाते विविधानि सिंहव्याघ्रादीनि रूपाणि जगृहाते निरोधार्थ

तेषामेवं प्रपन्नानां सेवेषामसुरद्विषां संभूय सैवैरस्माभिः कार्यः सर्वात्मना वधः ११ एवं सर्वान्समादिश्य पर्वते तौ रेमहोदधेः क्रूरां मतिं
समास्थाय जग्मतुः सर्वतोमुखौ १२ यज्ञैर्यजंति ये केचिद्याजयंति च ये द्विजाः तान्सर्वान्प्रसभं हत्वा बलिनौ जग्मतुस्ततः १३ आश्र
मेष्वग्निहोत्राणि मुनीनां भावितात्मनां गृहीत्वा प्रक्षिपंतस्म सुविश्रब्धौ महासेनिकास्तयोः १४ तपोधनैश्च ये युक्तैः शापाउत्क्रामहात्मा
भिः नाक्रामंत तयोस्तेपि वरदाननिराकृताः १५ नाक्रामंत यदा शापा बाणा मुक्ता शिलास्विव नियमांस्तपरित्यज्य व्यद्रवंत हि
जातयः १६ पृथिव्यां यततयः सिद्धा दांताः शमपरायणाः तयोर्भयात्तद्रुवुस्ते वैनतेयादिवोरगाः १७ मथितैराश्रमैर्भग्नैर्विकी
र्णकलशस्रुवैः शून्यमासीज्जगत्सर्वं कालेनेव हतं तदा १८ ततो राजन्नदृश्यद्भिः ऋषिभिश्च महासुरौ उभौ विनिश्चयं कृत्वा।
विकुर्वाते वधैषिणौ १९ प्रभिन्नकरटौ मत्तौ भूत्वा कुंजररूपिणौ संलीनमपि दुर्गेषु निन्यतुर्यमसादनं २० सिंहौ भूत्वा पुन
र्व्याघ्रौ पुनश्चांतर्हितावुभौ तैस्तै रुपायैस्तौ क्रूरौ ऋषीन्दृष्ट्वा निजघ्नतुः २१ २१ २१ २१

यततस्तद्रूपाज्ञानात प्रकटान्मुनीन् गजादिरूपैर्निजघ्नतुरित्यर्थः १९ तेर्ध्वाहप्रभिन्नेति। प्रमेदनप्रभिन्नौ करटौ गंडौ येषां ययोस्तौ। संलीनमपि मुनिं २० २१ ॥

उत्सवोपात्तविवाहादिः २२ निवृत्तविपणाः क्रयविक्रयादिव्यवहारशून्याः आपणाः हट्टाः २३ अस्थीनि हस्त्यादीनां संबंधीनि कंकालाः देहसंध्यस्थीनि पार्श्वादिसहितानि २४

निवृत्तयज्ञस्वाध्याया मग्नाश्च पतिद्विजाः उत्सन्नोत्सवयज्ञा च बभूव वसुधा तदा २१ हाहाभूता भयार्त्ता च निवृत्तविपणापणा निवृत्तदेव कार्या च पुण्योद्वाहविवर्जिता २३ निवृत्तकृषिगोरक्षा विध्वस्तनगराश्रमा अस्थिकंकालसंकीर्णा सर्वभूतोग्रदर्शना २४ निवृत्तपितृकार्यं च निर्वषट्कारमंगलं जगत्त्वतिभयाकारं दुःप्रेक्ष्यमभवत्तदा २५ चंद्रादित्यौ ग्रहास्तारा नक्षत्राणि दिवौकसः जग्मुर्विषादं तत्कर्म दृष्ट्वा सुंदोपसुंदयोः २६ एवं सर्वा दिशो दैत्यौ जित्वा क्रूरेण कर्मणा निःसपत्नौ कुरुक्षेत्रे निवेशमपि चक्रतुः २७ इत्यादिपर्वणि २०४

नारद उवाच ततो देवर्षयः सर्वे सिद्धाश्च परमर्षयः जग्मुस्तदा परामार्तिं दृष्ट्वा तत्कदनं महत् १ तेभिजग्मुर्जितक्रोधा जितात्मानो जितेंद्रियाः पितामहस्य भवनं जगतः कृपया तदा २ ततो ददृशुरासीनं सह देवैः पितामहं सिद्धैर्ब्रह्मर्षिभिश्चैव समंतात्परिवारितं ३ तत्र देवो महादेवस्तत्राग्निर्वायुना सह चंद्रादित्यौ च शक्रश्च पारमेष्ठ्यास्तथर्षयः ४ वैखानसा वालखिल्या वानप्रस्था मरीचिपाः अजाश्चैवाविमूढाश्च तेजोगर्भास्तपस्विनः ५ ऋषयः सर्व एवैते पितामहमुपागमन् ५ ५

२५ ग्रहाः कुजादयः ताराः सप्तर्ष्यादयः नक्षत्राणि अश्विन्यादीनि २६ ७ अध्यायः तत्र १५ १५ १५ १५

६ ७ ८ ९ १० १५ ततस्याः गात्रे सूक्ष्ममपि तद्रंगं नास्ति पश्चरत्नदर्थे रूपसंपदो हेतुभूता या यत्र नियुक्ता निरीक्षतां दृष्टिर्न सज्जतीति संबंधः १६ १७ १८

ततोभिगम्य तेदेवाः सर्वएव महर्षयः सुंदोपसुंदयोः कर्म सर्वमेव शशंसिरे ६ यथा हृतं यथा चैव कृतं येन क्रमेण च न्यवेदयंस्ततः सर्वम
खिलेन पितामहे ७ ततो देवगणाः सर्वे तेचैव परमर्षयः तमेवार्थं पुरस्कृत्य पितामहमचोदयन् ८ ततः पितामहः श्रुत्वा सर्वेषां त
द्वचस्तदा मुहूर्तमिव संचिंत्य कर्तव्यस्य च निश्चयं ९ तयोर्वधं समुद्दिश्य विश्वकर्माणमाह्वयत् दृष्ट्वा च विश्वकर्माणं व्यादिदेश पिताम
हः सृज्यतां प्रार्थनीयेति प्रमदेति महातपाः ११ पितामहं नमस्कृत्य तद्वाक्यमभिनंद्य च निर्ममे योषितं दिव्यां चिंतयित्वा पुनः पुनः
१२ त्रिषु लोकेषु यत्किंचिद्भूतं स्थावरजंगमं समानयद्दर्शनीयं तत्तद्यत्र विश्ववित् १३ कोटिशश्चैव रत्नानि तस्या गात्रे न्यवेशयत् तां
रत्नसंघातमयीमसृजद्देवरूपिणीं १४ सा प्रयत्नेन महता निर्मिता विश्वकर्मणा त्रिषु लोकेषु नारीणां रूपेणाप्रतिमाभवत् १५
न तस्याः सूक्ष्ममप्यस्ति यद्गात्रे रूपसंपदा नियुक्ता यत्र वा दृष्टिर्न सज्जति निरीक्षतां १६ सा विग्रहवतीव श्रीः कामरूपा वपु
ष्मती जहार सर्वभूतानां चक्षूंषि च मनांसि च १७ तिलं तिलं समानीय रत्नानां यद्विनिर्मिता तिलोत्तमेति तत्तस्या नाम चक्रे
पितामहः १८ ॥

१९ प्रलोभं अर्थात्सुंदोपसुंदयोरेव २० ताभ्यां तयोः २१ मंडलं समुदायं २२ भगवान्विष्णुः प्राङ्मुखो भायादिनेनयामपितत्रमोहोद्योतितः २३ २४ द्रष्टुकामस्यस्थाणोः

आ० ३४५

ब्रह्माणंसानमस्कृत्यप्रांजलिर्वाक्यमब्रवीत् किंकार्यमपिभूतेशयेनास्म्यद्येहनिर्मिता १९ पितामहउवाच गच्छसुंदोपसुंदाभ्यामसु
राभ्यांतिलोत्तमे प्रार्थनीयेनरूपेणाकुरुमेप्रलोभनं २० तत्क्लृतेदर्शनादेवरूपसंपत्कृतेनवै विरोधःस्याद्यथाताभ्यामन्योन्येनतत्
थाकुरु २१ नारदउवाच सातथेतिप्रतिज्ञायनमस्कृत्यपितामहं चकारमंडलंतत्रविबुधानांप्रदक्षिणं २२ प्राङ्मुखोभगवानास्ते
दक्षिणेनमहेश्वरः देवाश्चैवोत्तरेणासन्सर्वतस्त्वृषयोभवन् २३ कुर्वंत्यातयातत्रमंडलंतत्प्रदक्षिणं इंद्रःस्थाणुश्चभगवान्धै
र्येणप्रत्यवस्थितौ २४ द्रष्टुकामस्यचात्यर्थंगतायापार्श्वतस्तया अन्यदंचितपक्ष्माग्रंदक्षिणंनिःसृतंमुखं २५ पृष्ठतःपरिवर्त्त
सापश्चिमंनिःसृतंमुखं गतायाश्चोत्तरंपार्श्वमुत्तरंनिःसृतंमुखं २६ महेंद्रस्यापिनेत्राणांपृष्ठतःपार्श्वतोग्रतः रक्तांतानांविशा
लानांसहस्रंसर्वतोभवत् २७ एवंचतुर्मुखःस्थाणुर्महादेवोभवत्पुरा तथासहस्रनेत्रश्चबभूवबलसूदनः २८ तथादेवनि
कायानांमहर्षीणांचसर्वशः मुखानिचाभ्यवर्त्तंतयेनयातितिलोत्तमा २९ तस्यागात्रेनिपतितातांदृष्टिस्तेषांमहात्मनांसर्वेषामे
वभूयिष्ठमृतेदेवंपितामहं ३० ॥

ए०म० ३४५

२५ २८ देवनिकायानां देवसंघानां येनदेशेनमार्गेणसायातितत्रयामुखानिअभ्यवर्त्तंत २९ ३० ३१ ३०

३१ ३२ अध्यायः जित्वा कृत्वा स्वाधीनं अव्यग्रं विविधं विशेषं यथा स्यात्तथा १ २ ३ ४ ५ प्रस्थशिखरे ६ ७ ८ वेषं शृंगारं आधाय साक्षिमंत्रा

गच्छं स्तातु तयासैवं देवाश्च परमर्षयः कृतमित्येव तत्कार्यं मेनिरे रूपसंपदा ३१ तिलोत्तमायां तस्यां तु गतायां लोकभावनः
सर्वान्नविसर्जयामास देवान्विगणांश्च तान् ३१ आदिपर्वणि सुंदोपसुंदाख्याने नारदवाक्ये। जित्वा तु पृथिवीं दैत्यौ निः
सपत्नौ गतव्यथौ कृत्वा त्रैलोक्यमव्यग्रं कृतकृत्यौ बभूवतुः १ देवगंधर्वयक्षाणां नागपार्थिवरक्षसां आदाय सर्वरत्नानि
परां तुष्टिमुपागतौ २ यदा न प्रतिषेद्धारस्तयोः संतीह केचन निरुद्योगौ तदा भूत्वा विजह्राते अमराविव ३ स्त्रीभिर्माल्यैश्च गं
धैश्च भक्ष्यभोज्यैः सुपुष्कलैः पानैश्च विविधैर्हृद्यैः परां प्रीतिमवापतुः ४ अंतःपुरवनोद्याने पर्वतेषु वनेषु च यथेप्सितेषु देशेषु
विजह्राते अमराविव ५ ततः कदाचिद्विंध्यस्य प्रस्थे समशिलातले पुष्पिताग्रेषु शालेषु विहारमभिजग्मतुः ६ दिव्येषु सर्वका
मेषु समानीतेषु तावुभौ वरासनेषु संहृष्टौ सह स्त्रीभिर्निषीदतुः ७ ततो वादित्रनृत्ताभ्यामुपातिष्ठंत तौ स्त्रियः गीतैश्च स्तुतिसंयु
क्तैः प्रीत्यामुपजग्मिरे ८ ततस्तिलोत्तमा तत्र वने पुष्पाणि चिन्वती वेषं साक्षिप्तमाधाय रक्तेनैकेन वाससा ९ नदीती
रेषु जातान्सा कर्णिकारान्प्रचिन्वती शनैर्जगामतं देशं यत्रास्तां तौ महासुरौ ॥१०॥

कृत्स्नमनोविकल्पं तेन सहत्वं यथा स्यात्तथा सस्मितकवासमा सौधारितत्वात् विविक्तावयवत्वेन जनं व्याकुलयंती समर्थः ।।८।। ९।। १०।। ७ ७ ७ः

स्वा०
३४६

यथितोकामेन ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१ २२

तौतुपीत्वावरंपानंमदरक्तांतलोचनौ दृष्ट्वावृतांवरारोहांथयथितोसंवभूवतुः ११ तावुत्थायासनाद्दृष्ट्वाजग्मतुर्यत्रसास्थिता उभौचका
मसंपन्नावुभौप्रार्थयतस्तदा १२ दक्षिणेतांकरेसुभ्रूंसुंदोजग्राहपाणिना उपसुंदोमिलित्याहवामपार्श्वेतिलोत्तमां १३ वरमहानमत्तौ
तावेवरसेनवलेनच धनरत्नमदाभ्यांतथासुरापानमदेनच १४ सर्वेरेतैर्मदैर्मत्तावन्योन्यंभ्रुकुटीकृतौ मदकामसमाविष्टौ
परस्परमथोचतुः १५ ममभार्यातवगुरुरितिसुंदोभ्यभाषत ममभार्यातववधूरुपसुंदोभ्यभाषत १६ नैषातवममै
षेतितत्रस्तौमन्युराविशत् तस्यारूपेणसंमत्तौविगतस्नेहसौहृदौ १७ तस्याहेतोर्गदेभीमेसंगृह्णीतामुभौतदा म
त्तश्चगदेभीमेतस्यांतौकाममोहितौ १८ अहंपूर्वमहंपूर्वमित्यन्योन्यंनिजघ्नतुः तौगदाभिहतौभीमौपेततुर्धरणीतले
१९ रुधिरेणावसिक्तांगौद्वाविवार्कौनभश्च्युतौ ततस्ताविद्रुतानार्यःसदैत्यगणास्तथा २० पातालमगमन्सर्वेविषा
दभयकंपिताः ततः पितामहस्तत्रसहदेवैर्महर्षिभिः आजगाममहात्माप्रशंसयन्तिलोत्तमां २१ वरेणच्छंदयामासभगवान्
पितामहः वरंदित्सुःसतत्रैनांप्रीतःप्राहपितामहः २२ ॥ ७ ॥ ७ ॥ ७ ॥ ७ एमकीमग्रहारण्डतममः

६२

राम०
३४६

तेजसाऽकेवसरदृष्टव्यसिभावकत्वात् सुदृष्टांसम्यग्दर्शनंकरिष्यतिकश्चित् २४ २५ २६ २७ २८ ३० ३१ इतितैलकंठीयेभारतभावदीपेसुंदो

स्थाहित्सवयितांलोकान्निवरिष्यसिभाविनि तेजसाचसुदृष्टांतांनकरिष्यतिकश्चन २३ एवंतस्मैवरंदत्वासर्वलोकपितामहः
ददेतैलोक्यमाधायब्रह्मलोकंगतः प्रभुः २४ नारदउवाच एवंतौसहितौभूत्वासर्वार्थेष्वेकनिश्चयौ तिलोत्तमार्थंसंक्रुद्धावन्योन्य
मभिजघ्नतुः २५ तस्मात्सर्वान्ब्रवीमिवः स्नेहात्सर्वानभरतसत्तमाः यथावोनात्रभेदः स्यात्सर्वेषांद्रौपदीकृते २६ तथाकुरुतभद्रंवोममचे
त्प्रियमिच्छथ २७ वैशंपायनउवाच एवमुक्तामहात्मानोनारदेनमहर्षिणा समयंचक्रिरेराजंस्तेन्योन्यवशमागताः २८ समक्षंतस्यदेव
र्षेर्नारदस्यामितौजसः द्रौपद्यानः सहासीनानन्योन्योभिदर्शयेत् २९ सनोद्वादशवर्षाणिब्रह्मचारीवनेवसेत् कृतेतुसमयेत
स्मिन्पांडवैर्धर्मचारिभिः नारदोप्यगमत्प्रीतइष्टंदेशंमहामुनिः ३० एवंतैःसमयःपूर्वंकृतोनारदचोदितैः नचाभिद्यंततेसर्वेतदान्यो
न्येनभारत॥ ३१ आदिपर्वणिसुंदोपसुंदोपाख्यानंसमाप्तं वैशंपायनउवाच एवंतेसमयंकृत्वान्यवसंस्तत्रपांडवाः वशेशस्त्र
प्रतापेनकुर्वंतोन्यान्महीक्षितः १ तेषांमनुजसिंहानांपंचानाममितौजसां बभूवकृष्णासर्वेषांपार्थानांवशवर्तिनी। २ ७ ७॥

७७

वाक्यानां ... र्थप्रकाशः एवं १२ २ २ २ २ २७ ॥ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७ ७

नागैर्गीतैः सरस्वती बहुसंघैर्युक्ता वनस्थली साहित्यैर्जर्युक्ता मैत्रैश्च तुमनाज्ञा तयाचराजानो बलिनः एवंते मिथोह्युद्धिहेतवे सर्वे ३ १ हस्तधारणाक्षिपतांश्च

तेनृपास्तेज्यसा वीरैः पतिभिः सहपंचभिः बभूवपरमप्रीता नागैर्गीतैव सरस्वती ३ वर्तमाने युधिष्ठिरे पांडवे बहुमहात्मम् अववृक्षैनकुरु
वः सर्वैर्हीनदोषाः सुखान्विताः ४ अथ दीर्घेण कालेन ब्राह्मणस्य विप्राणांपते कस्यचित्तस्करानकुः केचिद्गत्वा नृपसत्तम क्षिपमाणे धनेत
स्मिन् ब्राह्मणं क्रोधमूर्छितः आगम्य राजं पांडवं श्रेष्ठमुक्तो ब्राह्मणपांडवान् ६ ह्रियते गोधनं ह्येते नेशं मे र क्षतात्मभिः अस्माच्च वासमहिष
पाश्च धावत पांडवाः ७ ब्राह्मणस्य वचनं तस्माद्धविर्ध्वांक्षैः प्रलुप्यते शार्दूलस्य गुहां शून्यां नीचः क्रोष्टाभिमर्शति ८ अरक्षितारं राजा
नं बलिषड्भागहारिणं तमाहुः सर्वलोकस्य समग्रपापचारिणं ९ ब्राह्मणस्वत्वे हृते चौरैर्धर्मार्थे च विलोपिते रोरूयमाणे च मयि
क्षिपतां हस्तधारणा १० वेश्मपापानुच्चार रोरूयमाणस्याभ्याशे भृशं विप्रस्य पांडवः तानि वाक्यानि श्रुत्वा च कुंतीपुत्रो धनंजयः ११
श्रुत्वा वचं महाबाहुर्माभैरित्याह तं द्विजं आयुधानि च पत्नीगृहं पांडवानां महात्मना कृष्णया सह तत्रास्ते धर्मराजो युधिष्ठिरः १२ संप्रवे
शाय वा शक्तो गमनाय च पांडवः तस्य चार्त्तस्य तैर्वाक्यैश्चोद्यमानः पुनः पुनः १३ आक्रंदे तत्र कौंतेय चिंतयामास दुःखितः ह्रियमा
णे धने तस्मिन् ब्राह्मणस्य तपस्विनः १४ ॥

सपत्नीपतायामिति सर्गे १० ११ १२ १३ १४ १५ १५

उपेक्षणाज्जः उपेक्षाजनः अधर्म इति स्थिरः १५ अनास्तिक्यं आस्तिक्याभावः रक्षणे विषये १६ प्रतितिष्ठेत स्थिरः स्यात् तेन वनेऽस्माकं अधर्मश्च महान् भवेत् राज्ञा
न महीलोकं च आपृथ्व्या गारवस्य संमतिमपि गते सति १७ अनुमेवेऽस्मिन् कस्मिन्नापि लिप्यामहे इममारांग अस्माकं ग्रामवने १८ अमत्वनवासादिकं परिहृतं तुच्छं । धर्मं गतानुस्मृ अधर्मो

पि३

अस्माकमपमानं तेनं तस्य कर्तव्यमिति निश्चयः उपेक्षणाज्जोऽधर्मः सुमहान्स्यान्महीपते १५ यद्यस्मत्कृते तोह्यनिन केनोपाय
रक्षणं अनास्तिक्यं च सर्वेषामस्माकमपि रक्षणे १६ प्रतितिष्ठेत लोकेस्मिन्नधर्मश्च ध्रुवो भवेत् अनादृत्य तु राजानं गते म
यि नमंडपः १७ अज्ञातशत्रोर्नृपतेर्मर्यादा न कृतं भवेत् अनुगेहे शरणं हस्तं वनवासो भवेन्मम १८ सर्वमन्यत्परित्यक्तं धर्म
णात्तु महीपते अधर्मश्चैव महान्स्यात् वने वा मरणं मम शरीरस्य विनाशेन धर्म एव विशिष्यते १९ एवं विनिश्चित्य ततः
कुंतीपुत्रो धनंजयः अनुप्रविश्य राजानमापृच्छ्य च विशांपते २० धनुरादाय संहृष्टो ब्राह्मणां समभाषत ब्राह्मणाग
म्यतां शीघ्रं यावत्परधनैषिणः न दूरं ते गताः क्षुद्रास्तावद्गच्छावहे सह २१ यावन्निवर्तयाम्यद्य चोरेभ्यस्ता हृतं तव ॥७

६१

महान् वा शत्रुरस्यार्थे येनाधर्मेण मम वने मरणमपि तस्मात् स एवास्तु यतोऽस्मात् ब्राह्मणस्य रक्षणाज्जोऽधर्मः स्यात् १९ आपृच्छ्य धनुरादाय २० २१

श्वा०
३४८

समुपाकृत्य समाघस्य पुरं आजगामेति द्वितीयेनान्वयः २३ २५ समयः अनुमेव षड्गुण्यदशारार्थिकोपनयामनियमः २६ मज्जमानया सलिलं सा २७ २९ अनु

सोनुरस्य महाबाहुर्लोकेमारथीध्वजी शौरेर्विघ्रमतां स्थाणं नत्रिसर्वम स्तुतं ब्राह्मणं समुपाकृत्य पशुः प्राणवत्पुण्यवः २३

ततस्तेहा [illegible] धर्म पार्थोहत्वात मे स्थितातपे आजगाम पुरं वीरः मत्स्यसाचीधनंजयः २४ स्वामि

वाचगुरुं नमस्वनमैवे आज्ञामिनेदितः धर्मराजमुवाचेदं व्रतमारितं सममम २५ समयः समतिकांतोभवत्संदर्शनं मया अनघा

आमि ४ संगमिसमयेयात्स्यषष्ठः कृतः २६ इत्युक्तोधर्मराजस्तु सहसावाक्यमप्रियं कथमित्यब्रवीद्वाचा शोकार्तः मज्जमानया २७ युधिष्ठि

रगुडाकेशं भ्राता भ्रातरमच्युतं उवाच होमोराजा व्यधनंजयमिदं वचः २८ प्रमाणमसियदि ते मतः श्रणुष्वेमनघ अनुमेवेशा

यदृष्टं कृतवान्स्वममाप्रियं २९ सर्वं तदनुजानामि यल्लोकं नवमेस्थिरं गुरोरनुमतेनात्मोपघातेनपवीपसः पुत्रो यतो नुमते

आत्मोपघ्नविधिलोपकः ३० निवर्तस्व महाबाहो कुरुषस्व नमम नहितेधर्मलोपोस्ति न चतेधर्षणाकृता ३१ अर्जुन

उवाच नयानेनवरं कर्मयदितेमभवतः कृतं नमस्कारं बलिष्यामिमस्तेनायुधमालभे ३२ वैशं सोमन्नुत्त्याप राजानं वनवर्माव

शीक्ष्णितः वैवेद्यास्त्रवर्णगणवामान्समुजगामहः ३१

पा१

जानामिब्राह्मणार्थं त्वेन गुणात्मनेवंगीकरोतिस्म लोकं प्रियपंत्वयातो निघ्नः विधिलोपकः धर्मघ्नः ३० तद्येतत्सर्षा ३३ ३३ ३ ३ ७ रामजीरामजी

राम०
३४८

अध्यायः तंप्र १ भैक्षाः भिक्षान्नेविनोयतयोब्रह्मचारिणश्चैवाक्षाइतिपाठेवाल्लोगीतोमुचोवत्स्लेतथातीस्तामनोत्पोपीतिमिदिनोवाक्षाइसेवुमुख्यःपातः२ श्रमणाः

इत्यादिपर्वणिअर्जुनतीर्थयात्रायां वैशं तंप्रयांतंमहाबाहुंकौरवाणांयशस्करं अनुजग्मुर्महात्मानोब्राह्मणावेदपारगाः १ वे
दवेदांगविद्वांसस्तथैवाध्यात्मचिंतकाः भैक्षाश्चभगवद्भक्ताः सूताः पौराणिकाश्चये २ कथकाश्चापरेराजन्श्रमणाश्चवनौ
कसः दिव्याख्यानानियेचापिपठंतिमधुरंद्विजाः ३ एतैश्चान्यैश्चबहुभिः सहायैः पांडुनंदनः वृतः श्लक्ष्णकथैःप्रायान्मरुद्भिरिव
वासवः ४ रमणीयानिचित्राणिवनानिचसरांसिच सरितः सागरांश्चैवदेशानपिचभारत ५ पुण्यानिचैवतीर्थानिददर्शभरत
र्षभः सगंगाद्वारमाश्रित्यनिवेशमकरोत्प्रभुः ५ तत्रतस्याद्भुतंकर्मशृणुत्वंजनमेजय कृतवान्यद्विशुद्धात्मापांडूनांप्रवरोहिसः ६
निविष्टेतत्रकौंतेयब्राह्मणेषुचभारत अग्निहोत्राणिविप्रास्तेप्रादुश्चक्रुरनेकशः ७ तेषुप्रबोध्यमानेषुज्वलितेषुहुतेषुच कृतपुष्पो
पहारेषुतीरांतरगतेषुच ८ कृताभिषेकैर्विद्वद्भिर्नियतैः सत्पथिस्थितैः शुशुभेतीवतद्राजन्गंगाद्वारंमहात्मभिः ९ तथापर्या
कुलेतस्मिन्निवेशेपांडवर्षभः अभिषेकायकौंतेयोगंगामवततारह १० तत्राभिषेकंकृत्वासतर्पयित्वापितामहान्उ
त्तितीर्षुर्जलाद्राजन्नग्निकार्यचिकीर्षया ११ ११११

पुः ४

ऊर्द्ध्वरेतसः यतयोब्रह्मचारिणः ३ ४ ५ १० अग्निकार्यचिकीर्षयेतिपत्नीसांनिध्याभावेपिप्रवसतास्त्रीपामनहोमः कर्तव्यइतिदर्शितं ११ ११

आ०
३४९

अपकृष्टोऽपनीतः कामयानया तं पतिमिच्छंत्या ११ १२ अशंकमानेन आपद्धर्मं निश्चित्य यथाविधिना विस्मयरहितेन १४ १७ समुद्रगां गंगां १८ अनंगग्लपि

अपकृष्टो महाबाहुर्नागराजस्य कन्यया अंतर्जले महाराज उलूप्या कामयानया १२ ददर्श पांडवस्तत्र पावकं सुसमाहितः कौरव्य स्याथ नागस्य भवने परमार्चिते १३ तत्राग्निकार्यं कृतवान्कुंतीपुत्रो धनंजयः अशंकमानेन हुतस्तेनातुष्यद्धुताशनः १४ अग्नि कार्यं स कृत्वा तु नागराजसुतां तदा प्रहसन्निव कौंतेय इदं वचनमब्रवीत १५ किमिदं साहसं भीरु कृतवत्यसि भामिनि कश्चायं सुभगो देशः

पं ४ का च त्वं कस्य चात्मजा १६ उलूप्युवाच ऐरावतकुले जातः कौरव्यो नाम पन्नगः तस्यास्मि दुहिता राजन्नुलूपी नाम पन्नगी १७ साहं त्वा मभिषेकार्थमवतीर्णं समुद्रगां दृष्ट्वैव पुरुषव्याघ्र कंदर्पेणाभिमूर्छिता १८ तां मामनंगग्लपितां त्वत्कृते कुरुनंदन अनन्यां नंदय स्वाद्य प्रदानेनात्मनोऽनघ १९ अर्जुन उवाच ब्रह्मचर्यमिदं भद्रे मम द्वादशवार्षिकं धर्मराजेन चादिष्टं नाहमस्मि स्वयंवशः २० त व चापि प्रियं कर्तुमिच्छामि जलचारिणि अनृतं नोक्तपूर्वं च मया किंचन कर्हिचित २१ कथं च नानृतं मे स्यात्तव चापि प्रियं भवेत् न च पीड्येत मे धर्मस्तथा कुर्यां भुजंगमे २२ उलूप्युवाच जानाम्यहं पांडवेय यथा चरसि मेदिनीं यथा च ते ब्रह्मचर्यमिदमादिष्टवा न्गुरुः २३

तां कामेन पीडितां १९ २२ जानाम्यहं पांडवेय सादिना सर्वमतीद्रियं ज्ञानं दर्शयंती द्रौपदीनिमित्तमेव तत्र ब्रह्मचर्यं नान्यत्रेत्याह अत एवान्येपि चित्रांगदाया भद्रायाः पाणिग्रहणं संगच्छते २३ २३२३

२४ २६ २८ ३० ३३ परिसज्ञमुनिसमाजेतौविसस्य ३४ ३५ अध्यायः ३५ ३५ ३५ ३५ ३५ ३५ ३५ ३५ ३५३५

परस्परं वर्त्तमानानां तु पदं स्यात्मज्ञां प्रति योनो नु मविज्ञान्यो हा स्वै वेद्यासज्ञा वार्षिकं २४ यदेवेरे तत्र यव यमितिवः समयः हेतः तसिद्धं द्रोपदी हेतोरमोन्यस्मग्रामनं २५ ज्ञातवांस्तत्र धर्मार्थमन्य धर्मो न लुप्यति परित्राणं भवकर्त्तव्यमार्त्तानां राष्ट्रलोचन २६ कृत्वा मम परित्राणां नवधर्मो न लुप्यते यदि वाप्यस्य धर्मस्य सूक्ष्मोपि स्याद्व्यतिक्रमः २७ मत्कृते धर्म [illegible] स्वस्याः कृता प्राणास्मया ज्जुन भक्तांश्च भज मां पार्थ मतामेतन्मतं प्रभो २८ न करिष्यसि चेदेवं मत्तां मामुपधारय प्राणत्यागान्महावाहो चरधर्मसमुत्तमं २९ शरणं च प्रयन्नास्मि त्वामयपुरुषोत्तम दीनानना थान्कौन्तेय परिरक्ष मितिनिसशः साहं शरणा मम्येमि रोरवीमिव दुःखिता ३० यदि त्वं त्राभिका माहं तस्मात्कुरु मम प्रियं मत्समात्सम होनेन नमत्को मां कर्त्तुमर्हसि ३१ वैशंपायन उवाच एवमुक्तस्तु कौन्तेयः पन्नगेश्वरकन्यया कृतवांस्तत्तथा सर्वं धर्ममुद्दिश्य कारणां ३२ स नागभवने रात्रिं तामुषित्वा प्रतापवान् उदितेभ्युत्थितः सूर्ये कौरव्यस्य निवेशनात् ३३ आगतस्तु पुनस्तत्र गंगाद्वारं तपाम सह परित्यज्य गता साध्वी उलूपी निजमंदिरं ३४ दत्वा मनजवे रे पतं जले सर्व वेत्र भारत साध्या जलचराः सर्वे भविष्यन्ति न संशयः ३५ आदिपर्वणि अर्जुनतीर्थयात्रायां॥ ७ ७

कथयित्वा १ भृगुतुंगे ॐ नानाबहूनि प्रसिद्धे १ निवेशान्गृहाणि ३४५ ६ महानदीं गयास्योमेववसुदीं ७ ८ ९ राष्ट्रद्वारेषु पर्वतसंधिमार्गेषु कालिंगस्य

वैशंपायन उवाच कथयित्वा तु तत्सर्वं ब्राह्मणेभ्यः स भारत प्रययौ हिमवत्पार्श्वं ततो वज्रधरात्मजः १ अगस्त्यवटमासाद्य वसि
ष्ठस्य च पर्वतं भृगुतुंगे च कौंतेयः कृतवाञ्छौचमात्मनः २ प्रददौ गोसहस्राणि सुबहूनि च भारत निवेशांश्च द्विजातिभ्यः सोऽदद
त्कुरुसत्तम ३ हिरण्यबिंदौ स्नात्वा च तीर्थे च स्नात्वा पुरुषसत्तमः दृष्टवान्पांडवश्रेष्ठः पुण्यान्यायतनानि ४ अवतीर्य नरश्रेष्ठो ब्राह्मणैः
सह भारत प्राचीं दिशमभिप्रेप्सुर्जगाम भरतर्षभ ५ आनुपूर्व्येण तीर्थानि दृष्टवान्कुरुसत्तमः नदीं चोत्पलिनीं रम्यामरण्यं
नैमिषं प्रति ६ नंदामपरनंदां च कौशिकीं च यशस्विनीं महानदीं गयां चैव गंगामपि च भारत ७ एवं तीर्थानि सर्वाणि प
श्यमानस्तथाश्रमान् आत्मनं पावनं कुर्वन्ब्राह्मणेभ्यो ददौ च गाः ८ अंगवंगकलिंगेषु यानि तीर्थानि कानिचित् जगाम ता
नि सर्वाणि तीर्थान्यायतनानि च ९ दृष्ट्वा च विधिवत्तानि धनं चापि ददौ ततः कलिंगराष्ट्रद्वारेषु ब्राह्मणाः पांडवानुगाः अभ्यनु
ज्ञाप्य कौंतेयमुपावर्तंत भारत १० स तु तैरभ्यनुज्ञातः कुंतीपुत्रो धनं[illegible]जयः सहायैरल्पकैः शू
रः प्रययौ यत्र सागरः ११ स कलिंगानतिक्रम्य देशानायतनानि च हर्म्याणि रमणीयानि प्रेक्षमाणो ययौ प्रभुः ॥ १२

तीर्थानामनतिमहत्त्वात्तत्ता उपावर्तंत परावृत्ताः १० ११ १२ १२ १२ १ १ १

३१ १२ चैत्रवाहनमीत्रिवाहनमस्य दुहितरं १६ १७ २१ २३ हेतु विधिना पुत्रहेतोः पुत्रिकायामपि पुत्रशब्दप्रयोगविधानात् तल्लिंगलक्षीवनमिति वत्स तथाच

न्या १

महेन्द्रपर्वतं दृष्ट्वा तापसैरुपशोभितं समुद्रतीरेण शनैर्मणिपूरं जगाम ह १३ तत्र सर्वाणि तीर्थानि पुण्यान्यायतनानि च अभिगम्य महाबाहुरभ्यगच्छन्महीपतिं १४ मणिपूरेश्वरं राजन्धर्मज्ञं चित्रवाहनं तस्य चित्रांगदा नाम दुहिता चारुदर्शना १५ तां ददर्श पुरे तस्मिन्विचरन्तीं यदृच्छया दृष्ट्वा च तां वरारोहां चकमे चैत्रवाहिनीं १६ अभिगम्य च राजानमवदत्स्वं प्रयोजनं देहि मे खल्विमां राजन्क्षत्रियाय महात्मने १७ ततस्तच्छ्रुत्वा राजा त्वब्रवीत्कस्य पुत्रोसि नाम किं उवाच तं पाण्डवोऽहं कुन्तीपुत्रो धनंजयः १८ तमुवाचाथ राजा स सान्त्वपूर्वमिदं वचः राजा प्रभंकरो नाम कुलेस्मिन्संबभूव ह १९ अपुत्रः प्रसवेनार्थी तपस्तेपे स उत्तमं उग्रेण तपसा तेन देवदेवः पिनाकधृक् २० ईश्वरस्तोषितः पार्थ देवदेव उमापतिः स तस्मै भगवान्प्रादादेकैकं प्रसवं कुले २१ एकैकः प्रसवस्तस्माद्भवत्यस्मिन्कुले सदा तेषां कुमाराः सर्वेषां पूर्वेषां मम जज्ञिरे २२ एका च मम कन्येयं कुलस्योत्पादनी भृशं पुत्रो ममायमिति मे भावना पुरुषर्षभ २३ पुत्रिकाहेतुविधिना संज्ञिता भरतर्षभ तस्मादेकः सुतो योस्यां जायेत भारत त्वया २४ ॥ ७

ग्र २

लिंगं पुमांसमेवमेष पुत्राजायते नेति तेन पुत्र अपि पुत्रसंज्ञिता २४॥ ॥ २४ २५

मुक्तमौल्यं अद्यापि पुत्रिकापुत्रिका पुत्रस्यैव राज्यमिति इति शङ्कितोऽर्जुनः कोलेषु संबोधयते २५ समाः वर्षाणि इमाः इति पोवेपि हेमंतत्रयेण समवायो लग्नः परयेम

एतच्छुल्कं भवत्वस्याः कुलकृज्जायतामिह एतेन समयेनेमां प्रतिगृह्णीष्व पाण्डव २५ स तथेति प्रतिज्ञाय तां कन्यां प्रतिगृह्य च उवास नगरे तस्मिन् तिस्रः कुंतीसुतः समाः २६ तस्यां सुते समुत्पन्ने परिष्वज्य वरांगनां आमंत्र्य नृपतिं तं तु जगाम परिवर्तितुं २७ अपि पर्वे अर्जुनतीर्थयात्रायां वैशंपायन उवाच ततः समुद्रे तीर्थानि दक्षिणे भरतर्षभः अभ्यगच्छत्सुपुण्यानि शोभितानि तपस्विभिः १ वर्जयंति स्म तीर्थानि तत्र पंच स्म तापसाः आचीर्णानि तु यान्यासन्पुरस्तात्तु तपस्विभिः २ अगस्त्यतीर्थं सौभद्रं पौलोमं च सुपावनं कारंधमं प्रसन्नं च हयमेधफलं च तत् ३ भारद्वाजस्य तीर्थं तु पापप्रशमनं महत् एतानि पंच तीर्थानि ददर्श कुरुसत्तमः ४ विविक्तान्युपलक्ष्याथ तानि तीर्थानि पांडवः दृष्ट्वा च वर्ज्यमानानि मुनिभिर्धर्मबुद्धिभिः ५ तपस्विनस्ततोऽपृच्छत्प्रांजलिः कुरुनंदनः तीर्थानीमानि वर्ज्यंते किमर्थं ब्रह्मवादिभिः ६ तापसा ऊचुः ग्राहाः पंच वसंत्येषु हरंति च तपोधनान् तत एतानि वर्ज्यंते तीर्थानि कुरुनंदन ॥ ७ ७ ॥ ७ ७ ७ ॥ ७ ७ ७ ७ ७
पा० १

त्वा शत ९ इमा इति वैशंप्रयोगाब्द २६२२ अध्यायः ततः १ पंचतीर्थानि आगस्त्यसौभद्रपौलोमकारंधमभा रद्वाजानि पापानि पंचतीर्थानि २२ ४ धर्मबुद्धिभिः
धर्मरत्नाः रोषतीर्थे ग्राह्यविनाशं पश्यद्भिः ५६७ : ५६ ५६७ ५६७ १५६७ ॥ ७ ७ ७ ७ ७